শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

কুন্তী কৃত

# ॥শ্রীকৃষ্ণস্তুতিঃ ॥

*This document** has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

# ॥শ্রীকৃষ্ণস্তুতিঃ ॥

নমস্যে পুরুষং ত্বাদ্যমীশ্বরং প্রকৃতেঃ পরম্।
অলক্ষ্যং সর্ৱভূতানামন্তর্বহিরৱস্থিতম্॥ ১ ॥

মাযাজৱনিকাচ্ছন্নমজ্ঞাধোক্ষজমৱ্যযম্।
ন লক্ষ্যসে মূঢদৃশা নটো নাট্যধরো যথা॥ ২ ॥

তথা পরমহংসানাং মুনীনামমলাত্মনাম্।
ভক্তিযোগৱিধানার্থং কথং পশ্যেমহি স্ত্রিযঃ॥ ৩ ॥

কৃষ্ণায ৱাসুদেৱায দেৱকীনন্দনায চ।
নন্দগোপকুমারায গোৱিন্দায নমো নমঃ॥ ৪ ॥

নমঃ পঙ্কজনাভায নমঃ পঙ্কজমালিনে।
নমঃ পঙ্কজনেত্রায নমস্তে পঙ্কজাঙ্ঘ্রযে॥ ৫ ॥

যথা হৃষীকেশ খলেন দেৱকী
কংসেন রুদ্ধাতিচিরং শুচার্পিতা।
ৱিমোচিতাহং চ সহাত্মজা ৱিভো
ত্বযৈৱ নাথেন মুহুর্ৱিপদ্গণাত্॥ ৬ ॥

ৱিষান্মহাগ্নেঃ পুরুষাদদর্শনাত
অসতসভাযা ৱনৱাসকৃচ্ছ্রতঃ।
মৃধে মৃধেনেকমহারথাস্ত্রতো
দ্রৌণ্যস্ত্রতশ্চাস্ম হরেভিরক্ষিতাঃ॥ ৭ ॥

ৱিপদঃ সন্তু নঃ শশ্বত্তত্র তত্র জগদ্গুরো।
ভৱতো দর্শনং যতস্যাদপুনর্ভৱদর্শনম্॥ ৮ ॥

জন্মৈশ্বর্যশ্রুতশ্রীভিরেধমানমদঃ পুমান্।
নৈৱার্হত্যভিধাতুং ৱৈ ত্বামকিঞ্চনগোচরম্॥ ৯ ॥

নমোকিঞ্চনৱিত্তায নিবৃত্তগুণবৃত্তযে।
আত্মারামায শান্তায কৈৱল্যপতযে নমঃ॥ ১০ ॥

মন্যে ত্বাং কালমীশানমনাদিনিধনং ৱিভুম্।
সমং চরন্তং সর্ৱত্র ভূতানাং যন্মিথঃ কলিঃ॥ ১১ ॥

ন ৱেদ কশ্চিদ্ভগৱংশ্চিকীর্ষিতং
    তৱেহমানস্য নৃণাং ৱিডম্বনম্।
ন যস্য কশ্চিদ্দযিতোস্তি কর্হিচিদ-
    দ্বেষ্যশ্চ যস্মিন্বিষমা মতির্নৃণাম্॥ ১২ ॥

জন্ম কর্ম চ ৱিশ্বাত্মন্নজস্যাকর্তুরাত্মনঃ।
তির্যঙ্নৃষিষু যাদসসু তদত্যন্তৱিডম্বনম্॥ ১৩ ॥

গোপ্যাদদে ত্বযি কৃতাগসি দাম তাৱত
    যা তে দশাশ্রুকলিলাঞ্জনসম্ভ্রমাক্ষম্।
ৱক্ত্রং নিনীয ভযভাৱনযা স্থিতস্য
    সা মাং ৱিমোহযতি ভীরপি যদ্বিভেতি॥ ১৪ ॥

কেচিদাহুরজং জাতং পুণ্যশ্লোকস্য কীর্তযে।
যদোঃ প্রিযস্যান্ৱৱাযে মলযস্যেৱ চন্দনম্॥ ১৫ ॥

অপরে ৱসুদেৱস্য দেৱক্যাং যাচিতোভ্যগাত্।
অজস্তৱমস্য ক্ষেমায ৱধায চ সুরদ্বিষাম্॥ ১৬ ॥

ভারাৱতারণাযান্যে ভুৱো নাৱ ইৱোদধৌ।
সীদন্ত্যা ভূরিভারেণ জাতো হ্যাত্মভুৱার্থিতঃ॥ ১৭ ॥

ভৱেস্মিন্ ক্লিশ্যমানানামৱিদ্যাকামকর্মভিঃ।
শ্রৱণস্মরণার্হাণি করিষ্যন্নিতি কেচন॥ ১৮ ॥

শৃণ্ৱন্তি গাযন্তি গৃণন্ত্যভীক্ষ্ণশঃ
    স্মরন্তি নন্দন্তি তৱেহিতং জনাঃ।
ত এৱ পশ্যন্ত্যচিরেণ তাৱকং
    ভৱপ্রৱাহোপরমং পদাম্বুজম্॥ ১৯ ॥

অপ্যদ্য নস্তৱং স্বকৃতেহিত প্ৰভো
    জিহাসসি স্বিতসুহৃদোনুজীৱিনঃ।
যেষাং ন চান্যদ্ভৱতঃ পদাম্বুজাত
    পৰায়ণং ৰাজসু যোজিতাংহসাম্॥ ২০ ॥

কে ৱযং নামৰূপাভ্যাং যদুভিঃ সহ পাণ্ডৱাঃ।
ভৱতোদৰ্শনং যৰ্হি হৃষীকাণামিৱেশিতুঃ॥ ২১ ॥

নেযং শোভিষ্যতে তত্ৰ যথেদানীং গদাধৰ।
ত্বতপদৈৰঙ্কিতা ভাতি স্বলক্ষণৱিলক্ষিতৈঃ॥ ২২ ॥

ইমে জনপদাঃ স্বৃদ্ধাঃ সুপক্বৌষধিৱীৰুধঃ।
ৱনাদ্ৰিনদ্যুদন্বন্তো হ্যেধন্তে তৱ ৱীক্ষিতৈঃ॥ ২৩ ॥

অথ ৱিশ্বেশ ৱিশ্বাত্মন্বিশ্বমূৰ্তে স্বকেষু মে।
স্নেহপাশমিমং ছিন্ধি দৃঢং পাণ্ডুষু ৱৃষ্ণিষু॥ ২৪ ॥

ত্বযি মেনন্যৱিষযা মতিৰ্মধুপতেসকৃত্।
ৰতিমুদ্বহতাদদ্ধা গঙ্গেৱৌঘমুদন্বতি॥ ২৫ ॥

শ্ৰীকৃষ্ণ কৃষ্ণসখ ৱৃষ্ণ্যৃষভাৱনিধ্ৰুক
    ৰাজন্যৱংশদহনানপৱৰ্গৱীৰ্য।
গোৱিন্দ গোদ্বিজসুৰাৰ্তিহৰাৱতাৰ
    যোগেশ্বৰাখিলগুৰো ভগৱন্নমস্তে॥ ২৬ ॥

॥ ইতি শ্ৰীকৃষ্ণস্তুতিঃ সংপূৰ্ণা ॥